त्वेनग्रहस्य संख्यानपेक्षत्वान्नैकवच्यग्रहोपकारित्वं तद्द्वारावासंमार्गोपकारित्वं संभवतीति लाघ्याशयं स्वयं उमाह सत्यां चेति
यद्योद्देश्यविशेषणस्याविवक्षितत्वे ष्टवर्षब्राह्मणोपनयनादिविधावुद्देश्यब्राह्मणादिविशेषणस्याष्टवर्षत्वादेः अमावास्याया
मपराह्णे पिंडपितृयज्ञेन चरंतीत्यत्रचोद्देश्यामावास्याविशेषणमपराह्णः प्राचीनप्रवणविधौ चोद्देश्यप्रवणविशेषणप्राची
नत्वं यावज्जीवविधौ चोद्देश्यजीवनविशेषणं सायमाद्यपि न विवक्ष्येत ब्राह्मणसुरापाणादिनिषेधे चोपादेयब्राह्मणादि
विशेषणं लिंगादि विवक्ष्येतेत्याशंकानिरासार्थोऽयं ग्रंथः। आकांक्षाधीनत्वाद्विशेषणविवक्षाया ब्राह्मणादेश्चोपनयनादावुद्दे
श्यत्वेऽपि यत्नोऽनवगतरूपत्वेन विशेषणाकांक्षत्वाद्विशेषणविवक्षा निषेधे चोपादेयत्वेऽपि ब्राह्मणादेरनुवाद्यत्वेन प्राप्तत्वेन नि
षेधान्वयाद्विशेषणस्यानाकांक्षितत्वेनाविवक्षेत्युक्तेत्याशयः। एवं तर्हि उद्दिश्यमानस्य किं संख्याविवक्ष्यते नेति संशयोपपद्या
सा न युज्यतेत्याशंक्याह सा चेति। विधेयक्रियानुष्ठानार्थत्वेनापाद्यत्वलक्षणोपादेयत्वाभावेऽपि प्रतीत्यत्वलक्षणोपादेयता
ब्राह्मणामावास्यादिष्वविवक्षिता। उपनयनपितृयज्ञाद्यनुष्ठानकाले हि ब्राह्मणामावास्यादेर्नियमेन प्राप्त[illegible]त्वापादकस्याप
क्रतोः सर्वसाधनत्वस्याभावात्तत्कालप्राप्तेव ब्राह्मणादेर्नदत्वेनोपनयनाद्यनुष्ठानायोगात् ब्राह्मणादिसिद्धत्वकारेणाप

रा. नयनादिविधानाद्ब्राह्मणादेश्च कालाद्यपायेऽपि सत्तः सिद्धस्य प्रतीत्यतावश्यामुपगंतव्या यहादेश्च प्रकृतापूर्वसिद्ध्य
३५ र्थमुपादानत्वेन संमार्गादिकाले नित्यआक्षेपनिषेधस्य च प्राप्तविषयत्वनियमान्निषेधकार्य्यायाश्च निष्टत्तेश्च पूर्वत्ति पूर्वकत्वनि
यमात्तु रापाणादिनिष्टत्तिकालेन कारिणो ब्राह्मणादेर्नित्यशास्त्रेस्य प्रतीत्यत्वादुद्देश्यत्वं विवक्षितं । अतः कीदृक् ब्राह्मणा
35 दिरूपनयनाद्यनुष्ठानार्थप्रतीक्षितव्यस्तत्तुपादेयेषु विशेषणाकांक्षोत्पन्नेरुद्देश्येष्विह यहादिष्वनुत्पन्नेरनाकांक्षितत्वेना
द्देश्यविशेषणस्याविवक्षा ह्युत्पादनायोद्दिश्यमानस्य किंसंख्यादि वक्ष्यतेन वेति संशयोपन्यासोऽप्युक्त इत्याशयः । उद्देश्येषु
विशेषणानाकांक्षामुपपादयति । उद्दिश्यमानेष्विहीति । प्रमाणान्तरावगतत्वात्संख्यानाकांक्षायां प्रकृतापूर्वसाधनस्य प्रक
रणात्संस्कार्यत्वावगते रुद्देश्यस्वरूपस्यापि प्रमाणान्तरावगतत्वान्न तत्समर्पकप्रातिपदिकार्थग्रहत्वाद्यस्यापि नाकांक्षा वार
स्यादित्याशंक्य प्रातिपदिकार्थान्वये संमार्गस्य संस्कारत्वासिद्धेः प्रकृतापूर्वसाधनस्य संस्कार्यत्वावगत्ययोगादुद्देश्यस्व
रूपानवगते रुद्देश्यं च विना निःफलत्वापत्तेर्विध्ययोगान्न तत्समर्प्यकप्रातिपदिकार्थान्वयाकांक्षोपपादनार्थं प्रातिपदि
कार्थेत्युक्तं । प्रकृतापूर्वसाधनत्वेवगतसंख्यस्यापि ग्रहादेः संमार्गाद्यन्वयेनवगतसंख्यत्वात्संख्याकांक्षा न विद्यते । ३५

त्याशंक्याह अत इति। प्रातिपदिकार्थान्वितप्रकृता सर्वसाधनमात्रग्रहसंमार्गाद्युपयावगतेर्विशेषणानाकांक्षातः शब्देनो
क्ता। अनेन चाविशिष्टं हि लक्षणमिति सूत्रावयवव्याख्यानमुक्तं नैतदस्तीत्येवमादिना ग्रन्थेन तच्छेषोपसंहारार्थं तस्मान्नैतदिति व्या
ख्या व्याख्यातं अत इति। लाघवेन सर्वसंस्कार्यत्वहेतुप्रदर्शनपूर्वं विहितक्रमः सर्वधर्माः स्यादिति सूत्रोक्तहेतुद्वयमनुक्तं तल्लक्षण
त्वादित्यनेनैव हेतूक्तेर्हेत्वनाकांक्षणाद्युक्तमाशंक्य लक्षणत्वादित्यनेन ग्रहत्वादेर्विधेयसंमार्गाद्यन्वय्युपसर्वसाधनलक्षण
त्वेन संमार्गान्वयितया विधेयत्वाभावात्तद्विशेषणत्वमनुतरां विधेयत्वं न संभवतीत्युक्तेर्ग्रहादिस्वरूपविशेषणत्वेनैकत्वादेर्वि
धियोगे पि ग्रहत्वादिलक्षिता सर्वसाधनविशेषणत्वेन विधिर्नविष्यतीत्याशंकायामाह संस्कारान्वयान्यथानुपपत्तिकल्प्यत्वेन
सर्वसाधनलक्षणायाः संस्कारान्वयात्यागः सर्वसाधनत्वप्राप्तौ तेर्विशेषणान्वयायोगाद्विशिष्टस्य संस्कारान्वयितया विध्या
नुपपत्तेः शुद्धविधौ च विशेषणस्याविधेयत्वापत्तेः सर्वसाधनविशेषणत्वेनार्थ्यैकत्वादेर्विधिः संभवतीत्येवं निरासायैतद्
उद्दयानुकर्षणमिति सूचनायाविधेयत्वार्थं तल्लक्षणत्वोक्तिं व्याख्यातुमाह सर्वेति। विधेयत्वनिवृत्त्यर्थमात्रस्य हेतुतत
स्तद्विशेषणस्य सुतरामविधेयत्वादनुष्ठानान्वयित्वेनार्थैकत्वानादेरित्याशयः। लक्षणत्वोक्तेरविधेयार्थत्वप्रकटन

36

यानां इत्यतानंगत्वोक्त्यालक्षिता। लक्षणाख्यानादित्यतां लौकिकदृष्टांतेनदर्शयति यथेति। ग्रहवख्याप्यितइदनादरापन्ने
ष्वमसेष्वपि संमार्गःप्रसज्येतेत्याशंक्याह तत्रेति। ग्रहादेर्लक्षणत्वेनविनातद्व्यक्तितेष्वर्थसाधनेषु संमार्गाद्यनुष्ठानासिद्धे
र्लक्षणत्वेनग्रहाद्याद्रियतेततश्चानुष्ठानान्वयित्वेनानादरेपिचमसेषु संमार्गान्वयश्चर्वसाधनलक्षणयहत्वाद्यलावान्नसंमा
र्गाद्यनुष्ठानापत्तिरित्याशयः। लक्षणत्वेनैवतत्त्वैकत्वादिविशिष्टमेवग्रहादिश्चत्यतामित्याशंकानिरासार्थोमात्रशब्दः॥
यदीत्यादिसविवितत्वमित्युक्तेशंकालाघवेबहुत्वविवक्षितेषिति। एवंबहुत्वस्याप्यविवक्षितत्वादयुक्तमाशंक्यैकवचनायोगा
त्किशेषत्वात्स्वार्थतात्पर्यासत्वेनव्याख्यातुमाह नत्विति। उच्यतइत्यादिपरिहारस्ताच्छ्रुत्याचष्टे तत्रेति। एकवचनस्यश्रमाद
पाठापत्तेरेतत्परिहारापरिसंतोषेणपरिहारांतरार्थमपिचेति। तच्छ्रुत्याचष्टे तेनेति। कारकसंबंधोपीत्यपिशब्दस्स्वितंश
तिपदिकार्थव्यहार्थत्वंव्याख्यातं। एवमप्येकवचननियमोनर्थकइत्याशंक्यबहुत्वविधौक्वपिंजलानाधिकरणवद्द्य
माणत्रित्वनियमदृष्टांतेनार्थवत्तामाह यथमंचेति। पुरोडाशावितिनियमद्विवचनंस्याहिंकिमर्थमित्याशंक्याह यस्ये
ति। पौर्णमास्याममावास्यायामग्नीषोमीयस्यपश्चसामान्याद्यर्थरहितायांवामावास्यायामाग्नेयैंद्राग्नरूपस्यपुरोडाशद्वयस्याभि ३६

न्तत्वाद्द्विवचनमित्येतद्दर्शयितुं यथोलयं हविराग्निमार्छेदैन्द्रं पञ्चशरावमोदनं निर्वपेदित्यार्थिगमनसंबद्धस्याह
विधौ निमित्तत्वेनोद्देश्यत्वाद्विवक्षितत्वेऽप्येकत्वापूर्वसाधनलक्षणत्वेन प्रतीतिमात्रोपयोगित्वाद्बहुत्वद्विवक्षितविशेषण
त्वसिद्धौ [illegible] लयपदानर्थक्यापत्तेरुलयवद्योद्देश्यन्तरगत्यनुपगमेन विवक्षां पूर्वपक्षयित्वाधिकारिको लयवा अनुप
गमेनोलयपदार्थक्यपरिहारः षष्ठाधिकरणे वक्ष्यमाणो दृष्टान्तितिनः ॥ पुरोडाशद्वयसद्भावाद्द्विवचनस्यासालंबनत्वेऽपि
नियमः किमर्थ इत्याशंक्याह ॥ यथाहीति । यथायामावैष्णवमेकादशकपालं निर्वपेत्सरस्वतीमाज्यस्य यजेतेति यागद्व
ये विहिते भावाख्यायाः उपांशुयाजपत्ने तद्विकारे सारस्वते वेदानन्तरं वेदिकरणपद होत्राभिमर्शनदृष्टं वृत्याज्यलागाउ
वाक्याग्नेर्मेर्ध्याग्नीषोमीयविकारे वामावैष्णवेह विरधिवासनानन्तरं वेदिकरण [illegible] पत्तेहोत्राभिमर्शनवार्घ्यमुपवाक्यास
मे रनियमेनैकस्य कल्पोच्यते प्रसज्यत इति । पूर्वपक्षयित्वात्सरस्वत्या पूर्वचोदनाल्लोकवदिति द्वादशाधिकरणसूत्रेणैक
स्य त्वादाभावैष्णव [illegible] कल्यः सारस्वते प्रसज्यत इति वक्ष्यते तथा सरस्वत्यादाग्नेयस्यैव पुरोडाशस्य त्रीण्यस्यानिमित्तत्वेन
ग्रहणमिति भ्रान्तिनिवृत्त्यै नियम इत्याशयः ॥ अपि वेत्यादिना द्विविधायकालिधानश्रुत्यवगतक्रियाद्वयविरोधेन

स्या २

रा॰ पूर्वश्रुतपरित्यागे इत्यादावन्वयबाधादयुक्तमाशंक्य इत्यादावन्वयाभ्युपगमेपि सिद्धांताव्याघातोक्तिमाशयेन व्याचष्टे। अ
३७ पिवेति। यद्वेत्यथ नेकसंख्यावान्नैकत्वेन विशेषणतायुक्तेत्याशंक्याह जातीति। वोदितेतु परार्थत्वाद्यथाश्रुतिप्रतीये
त। परार्थत्वव्याख्यार्थस्य यागार्थश्च पशुरिति लाघवादवयवस्य पशोरपि द्वितीयया प्राधान्यावगमादयुक्तत्वशंकां निरस्य
37 न्नसंख्यावच्छेदपशोऽनुरिति। लव्यस्य लावकापेक्षणाद्भृतस्य च लावकत्वोपपत्ते र्नतस्य लव्यार्थत्वे दृष्टार्थत्वं भूतस्य तु लव्यानपे
क्षणाद्गस्य भूतार्थतया मद्दृष्टार्थतेत्येकस्यैव व्याययस्य तु लव्यसमुच्चारणे कृतं सख्यायोपदिश्यत इति लाघवाद्रूढत्व
दुच्यां णां कर्मसंयोगेऽपि वेनालिसंबंध इति शूद्रारूढत्वं च द्वयोरक्याश्वितं। संस्काराद्वा गुणानामव्यवस्था स्यात्। यथा
श्रुतं तावत्सर्वपक्षेनसाध्यं व्याचष्टे एकवेदेवेति। अहवत्प्यापीत्यनेन प्रदर्शनार्थमित्यादि दृष्टमित्यंतं साध्यपराभिमतश्र
र्वपक्षार्थत्वेन व्याख्याय प्रदर्शनार्थत्वे इत्यनेनोच्यत इत्यादि प्रकल्प्यात इत्यंतेन त्रिरासार्थत्वेन व्याख्यायवाक्येन वेत्यनेन
श्रालिमतसर्वपक्षार्थत्वं तयोच्यते समाप्तीत्यादि लाघवशेषो व्याख्यातः। श्रुत्यावाक्यबाधस्यापमेलक्षणयायहसंबन्ध ३७
नोक्तिरयुक्तेत्याशंक्य वाक्येन गृहात्वयाभ्युपगमे स्वरूपेणवान्वया[illegible]पत्ते स्सद्भावेन शुद्धसमार्गविधिमभ्युपगच्छ्यामिति

३।३।१

न्नस्य ग्रहस्य का गतिरित्यपेक्षिते संमार्गस्य कैमर्थ्याकांक्षायां सोमग्रहणानंतरकालत्वेन योग्यतयाधोवसिक्तसो
मनिर्हरणार्थत्वावसायात्सोमग्रहसंस्कार्यत्वेनावगतस्य स्पष्टीकरणायोपलक्षणार्थतया ग्रहशब्दस्य गतिस्सूचनार्थो
वाक्येन चेत्यत्र यः ३ शुद्धसंमार्गविधानात्पूर्वपक्षपरिग्रहे तेषामर्थाधिकरणोक्तशुद्धावघातादिविधिः पूर्वपक्षसादृश्या
त्तदनंतरमेतदधिकरणारंभापत्तिरित्याशंकानिरासायैकत्वसादृश्योक्त्या ग्रहे तेषामर्थाधिकरणोत्तरानारभ्यत्वोपपा
दिता। ननु पदस्य केवलाश्रयोगित्वात्पदांतरान्वये श्रुतिबाधस्यैव वाक्याधिकरणे परिहृतत्वाद्ग्रहादाविह केवलसंमा
र्गविधिः पूर्वपक्षयितुमशक्य इत्याशंक्याह रहविति। यथा वा ईसंयुक्ताश्चवघातादयस्तत्पदार्था विधीयंते श्रुत्या वा
क्येनैषां व्रीह्यादिसंयोग इति तेषामर्थाधिकरणसंदेहोपपादनसाध्यापद्याश्रुतश्रूयमाने शुद्धावघातादिविधौ न
त्वे तद्युक्तमिवेत्यादिवार्त्तिकेनाक्षेपं कृत्वा विधीयंते वघातादिः ४ श्रुत्या व्रीह्यादिसंगतद्वात्यादिवार्त्तिकेन व्रीहमवघा
तादयो व्रीह्यादिसंयुक्ताः ४ श्रुत्या विधीयंते किंत्व पूर्वसाधनांशलक्षणात्मकेन वाक्येनैषां समीहिताः पूर्वसाधनश्र
तेन व्रीह्यादिना योगो न स्वरूपेणेत्येवं व्याख्यया परिहारः ४ कृतश्चेह संमार्ष्टीति विधिशेषेणादृतग्रहत्वग्रहशब्दोप

रा॰ लक्षितापूर्वसाधनमात्रावृत्तेः संमार्गेप्युरूपेक्षायोनिकंप्रयत्नं विधातुंपुरुषार्थपर्यवसायित्वस्थलावापादकंशब्दन्न
शु स्वर्णनात्मकविधिस्वरूपेणैवशक्नोतिअप्राप्तग्रहत्वेशब्दान्वयात्मकेनतुवाक्येनसंमार्गस्यग्रहत्वसंबंधंविधातुं
शक्नुयात्। अतस्तत्रापूर्वसाधनमात्रानुयेनपर्यवसितार्थः श्रुतिर्वाक्यीयविशेषान्नयंबाधतेतस्मादपूर्वसाधनमात्रत्वलक्ष
38 णयाग्रहशब्दोवर्णनीयः।तेनचमसेष्वप्यपूर्वसाधनत्वाविशेषात्संमार्गसिद्धिरित्येवंव्याख्यायाकार्यइति।परिहा
रेत्यंतमवघातादिसाध्यालावेपिकथंचित्साध्यादवघातवदाववोक्तिः।भंगाख्यान्नेपसाम्यस्याप्रसिद्धत्वाद्धारास्यपरि
हारसिद्धेर्दृष्टांततयोक्तिः। एवंतस्यावघातादिन्यायेनसंमार्गस्यापिपरमापूर्वप्रयुक्तत्वायोगेनावांतरापूर्वप्रयुक्तत्वमि
ष्टेर्ग्रहत्वलक्षितस्यावांतरापूर्वसाधनत्वस्यचमसेषुसावाद्यत्वस्यासिद्धेर्नतदधिकरणमारभ्यमित्याशंक्यतेनन्विति।ए
कत्ववद्ग्रहत्वैकार्थसमवायित्वस्याप्युद्देश्यापूर्वसाधनविशेषणस्याविवक्षितत्वशंकापन्नेषामर्थाधिकरणसिद्धांता
न्तेयएतदधिकरणारंभेणपरमतेनतावत्पौनरुक्त्यंपरिहरति सत्यमिति। वाच्यैकार्थसमवायित्वं विनापूर्वसाधन शु
त्वस्यलक्षयितुमशक्यत्वेनवाच्यैकार्थसमवायस्यावांतरापूर्वसाधनत्वस्यैवलक्ष्यत्वानुद्देश्यत्वेनोद्देश्यविशेषणत्वा

सावृत्तेषामर्थाधिकरणसिद्धांतान्तेपायोगेनैतत्परिहारापरितोषात्स्वमतेनान्यथापरिहरति। अथ वेति। ननुतेषा
मर्थाधिकरणोक्तयथासंयोगव्यवस्थान्तेपेणाऽपूर्वपक्षेस्थलसंमार्जनादिवत्संयोगानादरसिद्धौसंस्कारएवहेतुः
क्रियुक्तातदनान्तेपेतुकिमर्थत्याशंक्याह संस्कारादिति। प्रतिप्रधानमावृत्त्यासंस्कारानुष्ठानद्याऽपूर्वसाधनेनप्रयुक्त
त्वात्त्वमसेतुसंस्कारालावेवेतुल्याप्यापनेरपूर्वसाधनत्वव्याहतिः सूत्रवनार्थसंस्कारत्वोक्तिरित्याशयः। सर्वप्रधानेष्वनुष्ठानमे
वोपपन्नेतेनानुष्ठानंचममेषपीत्यतदाख्यानार्थसंस्कारोक्तिरिति सावधारणानुष्ठानवाचिक्रियाशब्दाध्याहारोपगमेनोपपन्नव्या
ख्यानार्थोपपादनशब्दाध्याहारोपगमेनव्याख्येयं। यथाव्यवस्थावाऽर्थप्रकृतिसंयोगानुष्ठानशब्दप्रमाणत्वात्॥ यथाप्रकृतपूर्वपक्षेला
घवव्याख्यानेसिद्धांतलाघवमपियथाश्रुतमेवव्याख्येयमिति सूचयितुमाह यथास्थूलंतावदिति। ग्रहशब्देनग्रहमुद्दिश्यतत्संब
धित्वेनैवसंमार्गोविधीयतेनतूद्देशइत्येवंग्रहशब्देनेति लाघवव्याख्यानुग्रहेतुरुक्तः। ग्रहसंमार्गान्वयस्यविवक्षितत्वेसंमार्गस्य
रूपस्यापिविवक्षितत्वापत्तेर्वाक्यानुरोधेनपदस्यप्रकृत्यवगतसमार्गस्वरूपविधिबाधप्रसंगात्तद्विरोधेनवाक्येयग्रहसंमार्गान्वयमा
धेवोधितेत्याशंक्य विशिष्टक्रियास्वरूपविधिकल्पनाद्वाविशेषणान्वयविधेश्चक्रियास्वरूपविधिबाधकत्वायोगात्प्रथंनच

स्वा ३

रा० त्यादिनञ्कृतिर्बाधिता नवतीत्यंतेनाप्यंशाख्यातं ग्रहान्तरस्य संबंधिनोप्यतश्प्राप्तत्वेपि संमार्गान्तरस्य संबंधान्तरस्याख्यातो
३९ प्राप्तत्वात्समेयजेतेत्यादिवक्रियास्वरूपविध्यनपेक्षत्वाद्वयविध्यनुपपत्तेर्ग्रहसंमार्गसंबंधविधौ संबंधांतरविधेरवश्यंतया विधा
दित्युक्तं। प्रदर्शनार्थं च पक्षेष्ववश्यंतयाविधाकस्य वित्संबंधांतरस्येत्येवमिदं व्याख्येयं। अनेन वाक्यस्य विधेयतया प्रयोजनं कृतस्य
संमार्गस्य प्रकृत्या ग्रहसंयोगाद्ग्रहेष्वेव संमार्गव्यवस्थेत्येवं स्वमूलव्याख्यास्वपि चिंता। परमार्थतस्त्वर्थस्योद्देश्यस्यापूर्वसाधनस्य
कृत्युक्तग्रहत्वसंयोगेनैवलक्षणया वा तु परमापूर्वस्योत्पत्त्यपूर्वमात्रपर्यवसायि ग्रहत्वनियमस्साध्यत्वाभावेन ग्रहत्वावच्छिन्ना
ख्याताद्ग्रहत्वेन लक्षणाशंकेयं ग्रहत्वैकार्थसमवायिनोऽवान्तरापूर्वसाधनस्यैव लक्षणायामन्याय्यत्वादित्येवं सौत्र हेतु।
व्याख्यातार्थग्रहत्वस्यापूर्वसाधनलक्षकत्वानभ्युपगमे ग्रहश्रुतिबाधापत्तेर्ग्रहत्वस्य लक्षकत्वेनानुवादत्वाद्ग्रहशब्देन ग्रहत्वस
समवाय्यवान्तरापूर्वसाधनं लक्षयित्वा तस्य संमार्गान्वयो विधीयते न च ग्रहसमवाय्यवान्तरापूर्वसाधनविशेषणान्वयितया संमार्ग
विधिमनपेक्ष्यापूर्वसाधनमात्रस्य तेन संमार्गेणान्वयः शक्यो विधातुम् अतोऽवान्तरापूर्वसाधनविशेषणान्वयितयैव संमार्गविधानात्
विधिश्रुतेरपूर्वसाधनमात्रान्वयविषयतामभ्युपगम्य ग्रहपदैकवाक्यतया ग्रहसमवायितया विशेषणात्संकोचलक्षणा ३९

39

बाधापत्तिरित्यन्नेऽक्तत इति प्रश्नः सर्वं यद्यपि गुरूपार्थपर्यवसायिफलावविधिष्कृत्या संमार्ष्टीति शब्दोऽसर्वसाधनान्वितसंमा
र्गगतं प्रयत्नं विधातुं शक्नोति तथापि यद्यहावरयालावे संमार्गद्वाराडुपकारित्वापन्नेऽसर्वसाधनद्व्यावयावगमेन यद्यावरय
स्यावश्याभ्युपगमनीयत्वाद्ग्रहसमवाय्यसर्वसाधनविशेषान्वयस्यैवावगतेः समार्गविधिस्त्रलावालोचने वाविशेषान्वयावग
तौ न कश्चिद्विशेष इति विधिसूत्रलाववाध्यकृत्पद्यमानशब्दास्यपगमेन यथोक्तोपस्कारयुक्तं सिद्धांतलाघवं व्याख्येयमिति सूत्र
यितुमाह। अपि वेति। नन्वित्याशंक्य लाघवं प्रत्यक्ष्यासमर्थभेदाद्युक्तमाशंक्य व्याचष्टे। नन्विति। नानादेवताद्युक्त ग्रहणसंस्क
तद्ग्रहभेदान्निमानामप्ययोगात्सामानामविधेयत्वाद्धि धैकसमधिगम्यत्वाद्वा सर्वग्रहप्रत्यक्ष्यासमर्थभेदालाभात्ययसामे
चावरूपं श्रीणातीत्यादौ वप्रत्यक्ष्यासमर्थभेदेऽन्यथापि न व्यवस्थाया नवमे वक्ष्यमाणाया एतदधिकरणाधीनत्वे नेदानीमसि
द्धावस्थत्वायोगात्सर्वस्यैव ग्रयोजकत्वावगतेः तस्यैवैकत्वाशयमेतद्भाष्यमित्याशयः। अपि वेत्यादिप्रत्यक्षे त्वंतत्परिहारलाघवं शं
काशय निरासममर्थत्वेन व्याख्यातुमाह। सत्यपीति। प्रत्यक्षात्यासम्भिन्नलावेऽपि देवताद्युक्तद्यथभेदान्यथानुपपत्तिकल्पनावि
धिविहितत्वेनात्यासानां प्रत्यक्ष्यासमर्थभेदोपपत्तिरित्याशयः। नन्वभ्यासैर्विना ज्योतिष्टोमरूपासिद्धेरर्थात्वेनाभ्यासा

रा० नामवघातादिवन्नाश्वर्थिताश्चीत्याशंक्याह विनापीति। ज्योतिष्टोमशब्दस्यास्यस्वरूपयागवाचितायायागास्यासवि
५० धिनिमित्तकत्वेनास्यासविधत्वाभावेन स्यस्वस्थापियागस्य ज्योतिष्टोमशब्दवाच्यत्वस्वरूपसिद्धेर्नदृष्टार्थत्वमस्यासस्यसंभवतीत्या
शयः। तस्मादित्युपसंहारस्वाष्टंव्याचष्टे तत इति। नन्वस्यासास्वीर्णाणंप्रत्यासन्नत्वेष्यफलवात्प्रयोजकत्वासंभवोतिक्रमका
रणमस्त्वीत्याशंक्याह अवघातादिवदेवेति। फलंत्विति स्वेवघातादेरपूर्वप्रयुक्तत्व सिद्धौ यद्यपि त्वेतासात्तादफलत्वं तथा
पिस्वरूपसिद्ध्यर्थतयानुपपन्नैवप्रयोजकत्वं न विघ्नतीत्यादि वान्निकेयोर्थोवर्णितिः सोऽत्रापि योज्य इत्यर्थः। ग्रहेकत्वं संबंधेत्र
नरितिसाध्यस्यतात्पर्यमाह नवेति स्थलिसमागविघ्नोक्त्यर्थत्वेनतस्य शब्दप्रमाणत्वादितिस्त्रावयवव्यारव्यार्थे श्वित्या
दिसाध्यंस्पष्टत्वान्नव्याख्यातं॥ पश्वानर्थक्यात्तदंगेषु॥ ॥ग्रहेष्वेवसंमार्गोनचमसेष्वितुक्तेसमदशारत्निर्वेषोडशिपात्रेनिवि
शतेत्यपेवेति चिंतायाः प्रासंगिकत्वेनानंतरसंगतिं चतुर्द्धाकरणाधिकरणस्य चमसाधिकरणसगत्यमिधानेनग्रहत्वं यथिस्यमा
णत्वात्स्यष्टत्वेनानलिख्यत्वेकश्चायस्याघ्योक्तसंदेहंवचनव्यक्तिसंदेहेनोपपादयति यदीति। ग्रहशब्दानुवादसामर्थ्यात्समदशा ५०
रत्निवक्ष्यग्रहसदृशषोडशिपात्रेनिवेशात्ग्रहपगमेनुवादात्षोडशिपात्रप्राप्तिमत्त्वासेत्वात्रानुवादत्वस्यचोघ्यायापत्तिमा

शंक्य सप्तदशारत्निर्भवेद्वाजपेयांगत्वेन विधीयमानस्य साक्षाद्वाजपेयान्वयायोगाद्वाजपेयान्वयियोग्यद्रव्यापेक्षायां
यूपस्य वाजपेयान्वयित्वात्साक्षाद्वाजपेयांगभूतायाश्च सोमलतायाश्च कविदलावात्य देयसोमरसाधारत्वद्वारा षोडशिपा
त्रस्याश्चेश्य यथा कथं विद्वद्देनोक्ता। सप्तदशारत्निशब्दस्य लोहितोष्णीषन्यायेनाप्राप्तविशेषणविध्यर्थत्वेषु पात्रान्वयपदार्थ
वऊद्वीत्यवयवयोगाद्वाजपेयशब्दस्य व्यपदार्थसमर्थकत्वात्स्पगमे संबंधिपरत्वोपपत्तेः कोसौ वाजपेयसंबंधीत्यपेक्षा
यां यूपवाजपेयान्वयात्पाद्यांतरापेक्षायावगतस्य सामान्यतो दैर्घ्यापेक्षे दैर्घ्यविशेषात्मकसप्तदशारत्नित्वविध्यौचित्यात्सो
डशिपात्रस्य यागमंतरोपात्तस्य यूपस्य साक्षाद्वाजपेयासंबंधित्वेन नत्वद्वावधानेपितत्यपदेशोपपत्तेश्च कथंषोडशिपात्र
निवेश इत्याशंक्याथापीत्युक्तं। संबंधिनो द्रव्यस्य वाद्रूपेण विशेषणे वाक्यभेदापत्तिस्तवनार्थायसद्भ्रः। यूपस्योद्देश्यत्वेद्यवहि
तवाजपेयान्वयसंबंधेपि विशेषणाविवक्षायां वाक्यभेदापत्तेर्वाजपेयशब्दस्य विशेषणत्वायोगमाशंक्यागत्या वाजपेयविशि
ष्टस्य यूपस्योद्देश्यत्वादुद्देश्यांतर्गतएव वाजपेयो नोद्देश्यविशेषणमिति स्तवनार्थो यथा कथंचिद्भ्रः। अविशेषितस्याप्युद्देश्य
त्वसंभवे विशेषणस्यानाकांक्षितत्वादुद्देश्यांतर्गतावच्छेदकत्वेन वाक्यभेदापत्तेर्विशेषणत्वापरितो वा द्वाजपेयप्रकरणाम्ना

रा. नेनवाजपेयसंबंधिद्रव्यप्रासंख्यातुवादपक्षेऽष्टमतेनोक्तः। वक्ष्यतीहैर्विशेषणं परत्वस्तवनार्थापरिमाणोक्तिश्च। तत्र निवे
४१ शे सति वाजपेयशब्दस्याजघ्येन लक्षयति मत्यक्षेतु वाजपेयप्रकरणमनुष्यत्यत इति लाघवद्वयोक्तस्त्रेहेतुद्वयस्यापरहेतुद्वयोप
लक्षणार्थत्वं दर्शयितुं सर्वपक्षमाह। किमिति। सप्तदशारत्निर्वाजपेयस्य यूप इत्यनंतरावयवसंलवे वाजपेयशब्दस्य वहितत्वप्रशब्दा
न्वयायोगात्प्रधानस्य तु वाजपेयान्वयसंलवे यागस्य तु पशुगणस्यान्वयायोगात्वाजपेयान्वयाश्रुतकथंतावलक्षणप्रक
रणाबाधसंलवेतद्बाधायोगात्कुतिश्चन्नवाजपेयशब्दप्रातिपदिकषष्ठीश्रुतिर्त्यांनवाजपेयान्वयसंलवे प्रातिपदिकलक्षणोहत्या
पादकत्वात्कल्पीययूपान्वयायोगाद्वाजपेयांगतैवयुक्ता न पशुयागांगयूपांगतेत्युक्ते वाजपेयान्वयेपि षोडशिपात्रांगत्वात्स्फ
पगमेन साक्षाद्वाजपेयांगत्वासंभवात्पारंपर्येणैव वाजपेयांगत्वं यूपान्वयेऽपि पक्षेऽप्रधानत्वादिहेत्वंतापक्षद्वयेऽपि विशेषा
त्सर्वपक्षासाधकतामाशंक्य यूपांगत्वावेदकवाक्यवत्षोडशिपात्रांगत्वावेदकप्रमाणाभावेन निवेश इत्याशंक्याह साक्षादि
ति। एवमपि यूपस्यापि लोके न षोडशिपात्रस्य द्वारमात्रत्वाद्व्यवधायकत्वं स्तवनार्थः साक्षात्वह॥ सप्तदशारत्निर्वयूपसाक्षाद्वा
जपेयान्वये कथं षोडशिपशुयागद्वारा वाजपेयांगत्वात् कथं षोडशिपात्रे निवेश इत्याशंक्याह तत्रेति। वाजपेयांग षोडशिग्रहा

तस्य सोमरसाधारद्वारा पिपात्रस्य वाजपेयान्वयेयहैन्द्रजुहोतीत्यातिदेशिकेन वाक्येन सप्तदशपात्राधिकयागरूपहोमां
गत्वाविरोधइत्याशयः। अनेन यानंतर्याक्रुतेरित्यानंतर्यशब्दस्याप्तस्यासान्नाव्यवाचिनःश्रुतिशब्दान्वयमंगीकृत्य सा
न्नात्संबंधिनिषष्ठीश्रुतेर्विनियोक्तृत्वादित्यपिव्याख्यासूचिता। मनन्त्वेविति सार्थं वाजपेयप्रकरणांतर्गतपशुयागान्वय
द्वारासप्तदशारत्निव्यस्य वाजपेयान्वयित्वात्सिद्धांतेपि प्रकरणानुग्रहोपपत्तेरयुक्तमाशंक्याधिकारलक्षणप्रकरणबाधे
पिकथंसावलक्षणप्रकरणबाधाशयत्वेनोपपादयति यद्यपीति। वाजपेयशब्दं जघ्योक्त्या द्विविधःक्रतुस्तत्र क्वापि प्रातिपदिक
श्रुतेरितरथैतिसार्थ्येणैवव्याख्यातत्वात्षष्ठीश्रुतिव्यावृत्ते वाजपेयस्येति। पक्षद्वयसाम्याल्लक्षणाद्वेरपर्य्यनुयोज्यत्वाश
क्तापरिहारार्थस्योक्तइतिलाघवस्याशयमाह। नवेति। प्रदितिश्यांशंप्रश्नमोक्तेतमादितिःपाशान्प्रमुमोक्तेतानित्येकव
चनवचनांतमंत्रयोर्द्वैतप्रकरणाम्नातयोर्वजवचनांतस्यैकपाशकेकर्मण्यसमवेतार्थकत्वेपूर्वपक्षयित्वाविप्रतिपन्नौविक
ल्पश्च्यात्समवाङ्गुणेन्द्व्यायकल्प्यनैकदेशत्वादितिनवमाधिकरणस्तत्रेण वज्रवचनस्यासमवेतार्थत्वेपितदनुरोधेनानुपसं
जातविरोधावस्थायांश्रुतस्यप्रातिपदिकस्योक्तर्षायोगान्नस्यैवतुप्रातिपदिकात्परप्रयोज्यवस्मृतेःप्रातिपदिकपारतंत्र्य

रा० लक्षणगुणत्वाव्यसायात्प्रातिपदिकाद्युरोधेन प्रातिपदिकार्थइत्यलक्षित तदवयवसंख्यावाचित्वलक्षणान्यायकल्पना
४२ याद्युक्तत्वाक्कर्मत्वङ्गत्वरूपानेकत्वङ्गवचनार्थसमुदायैकदेशत्वात्त्वङ्गत्वस्यसमवेतक[?]त्वप्रकाशनार्थंप्रयोज्यत्वेन
त्वेनावगतस्यत्वङ्गत्ववचनस्यार्थैकदेशत्वङ्गत्वाद्युरोधेनोक्तपीयोगान्म्नद्वयस्यप्रकरणाम्नानसाम्याद्विकल्पइति सिद्धांतेव
42 क्ष्यमाणेपश्वाकृतत्वेनत्वङ्गवचनस्यप्रातिपदिकंप्रतिगुणत्वानोर्इपशब्देपश्वाकृतत्वेनवाजपेयशब्दंप्रतिगुणत्वञ्चप्रत्युक्त
इतितस्यैवैकदेशोपन्यासश्चयूपशब्दस्योर्ध्वपात्रेगौणत्वात्स्फ्यपगमाद्यक्षणत्वाद्गौणत्वंविवक्षितं।तस्मादितिसूत्रपदोपसंहा
रत्वात्संख्यावष्टे तस्मादिति। साक्षाद्वाजपेयसंबंधिनिसप्तदशारत्नित्वविधौसाक्षात्संबंधिनोपिषोडशिपात्रस्यसामान्यतो
दैर्घ्यप्राप्तिमात्रेणविधेयसप्तदशारत्नित्वविषयतायानिष्प्रमाणकत्वेनावधारणाशंकेयूपशब्दस्यगौणत्वस्यापोडशिपा
त्रसमर्पणार्थंसाक्षाद्वाजपेयसंबंधिनिर्देशकत्वात्स्फ्यपगमप्रसंगात्परपदसामानाधिकरण्याभावेनचगौणत्वस्यायोगाद्यू
पस्यैवसाक्षाद्वाजपेयसंबंधित्वेननिर्देशापत्तेश्चतस्यचसाक्षाद्वाजपेयसंबंधित्वाभावेनसाक्षाद्वाजपेयसंबंधिनिसप्तदशार ४२
त्नित्वविध्यानर्थक्यप्रसंगाद्वाजपेयांगश्चतपशुयागसंबंधिनियूपेसप्तदशारत्नित्वविधिरित्येवंस्वव्याख्यार्थमेवमित्यादि

साध्यंतात्पर्यतो व्याचष्टे नन्वीति नचोद्दिष्टपाठशद्वसमभिव्याहृतो यूपशद्वस्तृतीयत इत्यर्थः। श्लोकं व्याचष्टे योहीति त्व
गत्युक्तावोक्त्यर्थत्वेनास्मत्पक्षे त्वित्यादिना वाजपेयएवेत्यादिनौ साध्यंव्याख्यातं। आनंतर्यादिति सर्वपक्षहेतोर्द्वेधा व्याख्या
समूलाव्याख्यानंतर्यं षष्ठीकृतीएकहेलया उलाघतेयन्त्विति। नैरंतर्यं तावद्वाजपेयशद्वस्य मध्यपाठात् सप्तदशारत्निशद्वव्यू
पशद्ववद्यूपशद्वेनापि तुल्यमित्यादिव्याख्याशयेनानुलापणेपरिहरतितत्तदिति। साक्षात्संबंधिनिवृष्ठीकृतेरिति द्वितीय
व्याख्याशयेनानंतर्यांत्तिकृतेरित्यनुलापणपक्षे वाजपेयाव्ययस्यानुवाघ्यत्वान्न साक्षान्वादर्शतिपरिहरतिश्रुतश्चेति। यूप
स्य सप्तदशारत्नित्वविधौ वाजपेयाव्ययानुवादमाशंक्यानंतर्यवलाद्वाविवक्षितस्याप्यव्ययस्यावगमो तश्चेत्याह नेनोक्तः॥
नत्वदीक्षाः सोमस्येत्यादिवत्प्रकरणप्राप्तस्यापि अधानाव्ययस्य परिसंख्यार्थत्वेनापि विधिसंभवेनुवादत्वास्फपगमो नयुक्त इ
त्याशंक्याह अस्त्विति वदृश्चीत्यपेक्षितस्यान्यपदार्थस्य वाजपेयशद्वेन समर्प्पणाशक्तेर्यूपशद्वेनैव तत्समर्पणावगमाद्यू
पस्य च वाजपेयाव्ययाद्वावात्सप्तदशारत्निवृष्ट्यवाजपेयाव्ययस्य पक्षत्यागेन यूपाव्ययपक्षो वलीवत इत्यर्थः। सप्तदशारत्नि
वृद्ध्यच वाजपेयेन सहसाक्षाद्वावृयश्व्यात्संबंधिमात्रद्वारा यूपद्वारा वा सर्वथानसंभवतीत्याह किंचेति। श्लोकं व्याचष्टे साक्षा

रा. त्वावदिति॥ यूपस्य वाजपेयांगत्वात्तावेशद्यतिवसपशुरूपं विशेष्टमिति तत्राप्येतद्वाजपेयस्थयूपविशेषणेनोन्निर्वयुज्यते त्याशं
४३ क्य पारंपर्याद्व्यादिशेषणत्वं व्याख्येयमित्याह तस्मादिति घरूपे कार्येषोपयोगिनोंगत्वावसायाद्यूपस्थवषट्कृतौ विज्ञा
तो त्यत्रि प्रकारत्वेन स्वरूपोपयोगं गानपेक्षणा कार्यस्यापि पशुनियोजनं यूपस्थयागस्यवातिदेशादेवज्ञातो पायप
रिमाणत्वेन तदुपयोगिनो यंगस्यानपेक्षणात् सप्तदशारत्नित्वस्य वाजपेयापूर्वोपयोगित्वोक्तेर्वाजपेयविशिष्टस्य यूपस्योद्दे
श्यत्वांगीकार्येति तात्पर्याशयः॥ विशिष्टानुवाददोषापत्तेर्भीत्योक्तदोषपरिहाराय स्वमतेनाधिकारलक्षणप्रकरणप्राप्तवाज
पेयानुवादमाह॥ अधिकारेति॥ अनंगगतस्यापि चसाप्तदश्यस्योपकारि स्थितत्वमात्रेण वाजपेयोपकारित्वोपपत्तेः कथंता
वात्मकमपि प्रकरणं न विरुध्यत इत्याह वदत्यतिहीति॥ कर्तृगुणे तु कर्मासमवायाद्वाक्यभेदः स्यात्॥ आनर्थक्यापत्त्याश्रु
तक्रियात्वयायोगेन तदंगावतारे स्थिते तद्विशेषचिंतावेनोत्तराधिकरणस्य पूर्वानंतरसंगतौ स्पष्टायामपि विक्रमेणोपस्था
नयोत्पन्नदंगावतारे सति संस्कारत्वापत्ते संमार्गादिवत्संस्कारचिंतानंतरमेव चिंता कार्या न साप्तदश्यगुणचिंतानंतरमित्या ४३
शंक्याह एवमिति॥ क्रियायाः समान्वात्क्रियात्वयायोगात् गुणत्वक्रियासाधनद्रव्यद्वारा क्रियात्वयेनार्थाद्द्रव्यसंस्कारत्वावग

43

५४३

नेर्गुणचिंतानंतरं चिंतायुक्तेत्याशयः ॥ ननु धातुसंबंधाधिकरणमुल्लंघ्यातिवशादतिक्रमणस्य क्रियांतरान्वयावगमे
ष्वारादुपकारित्वेऽप्यन्वयाविरोधात्कथं संस्कारत्वावगतिरित्याशंक्याह तत्रेति । आरादुपनमुख्यत्वेति स्मृतेर्वीप्सार्थस्याह
त्विरूपस्यातीन्द्रियस्यश्रवणमुलोपादानादारादुपकारित्वे च तं चवादादृष्ट्यनुपपत्तेः संस्कारस्य तु कार्ययोग्यताधानार्थत्वात्स
तिकार्यमादृष्टानुपपत्तेः संस्कारत्वावगतिरित्याशयः ॥ प्रयाजविधायि समिदादिवाक्येऽस्यासिक्रमवाक्यस्याद्युत्वात्प्रयाज
वाक्येऽश्रूयत इति लाघवमयुक्तमित्याशंक्यावांतरप्रकरणाशयं वंवाक्यान्क्वेः श्रुवयितुमाह एवञ्चेति तत्रेति संदेहलाघवस्याव
स्थितादिति ॥ विस्पष्टमुदाहृतिसंबंधश्रुतेः सर्वपदान्वयवचनस्यान्वययोगात्संदेहायोगमाशंक्याह संबंधेति ॥ यथाकथं पुनरस्यान्वयेतिला
घवेन विस्पष्टक्रमसंबंधावगमेनारुणाधिकरणसंदेहमाक्षिप्य हेतुगणमरुणिमानमित्यादिनाघ्येणशब्दवक्ष्यविसंवादान्य
रिहारोऽस्ति हि तत्रापि तथातिक्रमणस्यापि पणमुल्लंघ्य क्रियांतरसाधनत्वावगमाद्यस्त्वत्रावश्यवरूपालोचनेनासाधनत्वा
वगमात्संदेहक्षेपस्य परिहारो वाच्य इत्यर्थः ॥ एतदेव विवृणोतीति ॥ कर्म्मण इति ॥ पौनरुक्त्यान्न हि नेदमधिकरणमारभ्यमित्या
शंकायां ह्ययकृतोऽसावदेशवंतीति श्रयपद्मासमुलोऽसावमात्रवाविद्धस्मृतेरेकहायनी वत्समानाधिकरणद्द्यातुण

रा· दानाद्दृष्टविषयनियमेनोपपत्तिश्रुतस्य साध्यक्रियासंबंधस्यानुक्तसमानकर्तृकपूर्वकालत्वान्यथानुपपत्तिसाध्य
४४ त्वेन कर्तृश्रुतद्रव्यान्वयात्साङ्गनवगते ईदृशनियमोपपत्तिर्वा योगादपरिच्छेदकत्वेन वा क्रियायास्तृणस्यैव क्रियासाधनद्रव्यो
पादानानौपयिकत्वाद्दर्भाख्यस्य स्वद्रव्यस्येहद्वारत्वेनाभिमतस्यानेकक्रियासाधारण्येनैकहायनीवद्व्यवस्थित क्रिया
44 द्वारत्वायोगाच्च तुल्यवैषम्यमाह। नेन वेति। कर्म्मणः कर्म्मणा सह साध्यसाधनत्वलक्षणान्वयायोगादभिक्रामं जुहोतीति वा
क्यस्य विभागरूपो भेदः स्यादित्येवं पूर्वपक्षसूत्रावयवव्याख्यार्थं किंतावदितिभाष्यं व्याचष्टे। किंतावदिति। कर्म्मैव विधीयत
इत्युपक्रमात्सर्वार्थमभिक्रमणस्य कर्म्मेति प्रतिज्ञायां श्रुतायां जुहोत्यन्वयाद्धोममात्रार्थत्वं घटते। कुतः सर्वार्थतेति
घृष्टेः कर्म्मणो भिक्रमणस्य मूर्त्तत्वाद्धोमस्य कर्म्मसाधनत्वं न प्रतीयत इति कर्म्मसाध्यमध्येतिवद्व्रीहिलोकाज्जुहोत्यन्व
यस्माद्धि कुर्य्यादित्याशंक्य जुहोति संबंधं परित्यज्याभिक्रमणं विधीयत इत्युक्तं। श्लोकं व्याचष्टे नतावदिति। नहि त्याशंक्या
साध्यंयैनेव हेतुनाक्रीणातिना न संबध्यत इत्यादिनास्मिन्वाक्यभेदः स्यात्तारुण्याधिकरणशंकाभाष्यवदानर्थक्यपरिजिही ४४
र्षयैकवाक्यतापादनार्थत्वेन व्याचष्टे नत्विति। अथ यत्र क्रियान्वयायोगे पि कर्तृत्वेनावगतस्याध्वर्य्यादेः कर्तृत्वशक्तिजननार्थ

संस्कारापेक्षायांदेशांतरस्थकार्य्यप्रत्यासत्तिजननेनातिक्रमणस्यकर्तृशक्तिजनकतयाकर्तृरिंशतिसंस्काररूपस्यग
णत्वेनान्वयःसंभवतीत्येवंपरिहारार्थत्वेनकर्तृगुणस्येतिसूत्रावयवव्याख्यार्थमुच्यतइत्यादिग्रंथंव्याचष्टेपरिहारस्येतित्रुहे
त्यन्वयेऽपितदात्मिकर्तृत्वयाविरोधंनत्वितिग्रंथावयवेनाशंक्यनुहोतीत्येषसमानकर्तृत्वाविणसुकत्वाकर्तृस्वतगुरु
षात्वयित्वेनावगतमथातिक्रमणस्यत्नमाख्यातेक्रियाप्राधान्यानुरंगतयैवविधातुंशक्नोतिनस्यगुणत्वस्तगुरुषागतयेतिप
रिहारार्थंनैतदितिग्रंथावयवंव्याख्यातुमाख्यातस्त्वुक्तं।अत्रत्यतोवगतकर्तृत्वस्यगुरुत्वस्यप्रयोजनवत्त्वात्प्राधान्यलासे
नांगान्वययोग्यत्वेऽपिविधायकाख्याततयागानुरंगतयातिक्रमणस्यविधिर्नसंभवतीतिनत्वच्चापीतिग्रंथावयवेनाशं
क्यप्रकरणावगतयोर्दर्शपूर्णमासांगत्वावस्थातिक्रमणस्यकथंदर्शपूर्णमासयोरुपकर्तृत्वमित्यपेक्षायांयथाशक्नुयादितिप
बंधेनप्रत्यासन्नास्यकर्तृसंस्कारकजनकस्यप्रयोगवचनाद्विधिर्नविरुध्यतीतिपरिहारार्थंनैषइतिग्रंथावयवंव्याख्यातुमथ
चवित्युक्तं॥ ॥साकांक्षत्वेकवाक्यत्वात्समाप्तंहिसर्वेण॥ ॥सिद्धांतसूत्रव्याख्यार्थंनैतदित्यादिग्रंथाजेष्वेवातिक्रमणंनिवि
शतइत्यंतंग्रंथंव्याचष्टेसर्वथातावदिति।सर्वपक्षहेतोरुक्तलाघवेणश्चैवंपरिहारार्थंनत्वित्यादिग्रंथंव्याचष्टेशक्नोतीति।अ

प्र॰ ख्यातानिमच्यकर्तृगुणाश्रुतत्वात्कथं संस्कारान्वय इत्याशंक्याह अरुणया वदेवेति । कर्तृः श्रुत्या होमं प्रत्यंगत्वे तिक्रमणं प्र
४५ तिप्राधान्ये सति वैरूप्यं स्यात् यथा ह्यारुण्यस्य श्रुत्या गृहीताद्वाक्यादेकहायन्यन्वयो नैकहायन्याख्यगुणत्वेपि वैरूप्यदोषमापा
45 दयति तथातिक्रमणस्याप्यर्थाज्जिंगाकर्त्रन्वयो होमं प्रति कर्तृरूपसर्जनत्वेपि न वैरूप्यदोषमापादयतीत्यर्थः । आरुण्यस्यैक
हायन्यन्वयो होरमात्रत्वाद्ध्यतिक्रियांगत्वाविरोधी अतिक्रमणस्य तु कर्तृसंस्कारत्वे तदंगत्वाल्पपगमाद्धोमांगत्वविरुद्धे नेत्या
शंक्य संस्कारस्यायोग्यताधानार्थत्वेन कार्यानुवृत्तिमेव संस्कार्यं प्रत्यंगत्वावसाया क्वार्यमपि प्रत्यंगतास्त्येवेति परिहारः स्तु
र्थं तस्मादिति साधं त्यात्स्वष्टे एवं चेति । सर्वपित्तस्यातिरुद्धत्वे नलाध्योक्त विचारापरितोषात्स्वयं तु होत्येकवाक्यतामभ्युपगम्ये
वेति कर्तव्यताकांक्षालक्षणवाक्यकरणस्यांगानां वाकरणत्वेनेतिकर्तव्यतानाकांक्षत्वात्प्रयाजादीनामवांतरप्रकरणा
नुपपत्तेर्महाप्रकरणेनातिक्रमणस्य सर्वार्थत्वं पूर्वपक्षयित्वांगानामपि करणाव्यवहत्वावनायां करणत्वादिति कर्तव्यताका
क्षोपपत्तेरवांतरप्रकरणसंभवात्तस्य च महाप्रकरणाद्बलीयस्त्वाया वलाबलाधिकरणे वक्ष्यमाणत्वादवांतरप्रकरणेन प्रया
जमात्रार्थत्वमिति सिद्धांतो भिन्नाधिकरणे वर्ण्यत इत्याह यदा त्विति । यदैवं पूर्वपक्षकरणं तदा कर्तृगुणत्वेनातिक्रमणेऽनुहोतृत्व ४५

क्तकर्म्मान्वयिनि प्रयाजकर्म्मणो वांतरप्रकरणाभावेनानन्वयान्न प्रयाजवाक्येन सहाभिक्रमणस्यावांतरप्रकरणं काक्यै
कवाक्यत्वं प्रयाजादिति पूर्वपक्षसूत्रेणोक्ता साकांक्षत्वमिति प्रयाजचोदनातः प्रसूतायाः कथंतावाकांक्षा तत्रि भिन्नो योऽभिक्रमणस्य
प्रयाजैः सहांगांगिसंबंधस्तद्वारा यदभिक्रमणवाक्यस्य प्रयाजवाक्यैकवाक्यरूपमवांतरप्रकरणं तदेव सिद्धांतोऽभिधीयते
इत्येवं सूत्रद्वयं व्याख्येयमित्यर्थः ॥ नन्ववांतरप्रकरणरूपकवाक्यैकवाक्यस्य प्रयाजवाक्यैकवाक्यरूपमवांतरप्रकरणं तदेव सिद्धां
वाक्यैकत्वविवक्षायैकवाक्यत्वोक्तौ स्वार्थसमाप्त्यैव वाक्यस्य वाक्यांतरान्वयास्फुरणप्रमादसमाप्त्या किं नियुज्येतेत्याशंक्या
ह यदपीति ॥ प्रयाजस्वरूपविधिमात्रेण प्रयाजावांतरप्रकरणासमाप्तावपि जौहवद्वत्रुगृहीतादिप्रयाजगुणविधिना समाप्तिर्
विष्यतीत्याशंक्य गुणविधिनेत्युक्तं ॥ कथमसमाप्तिरवसीयत इत्याशंक्याह येनेति ॥ यस्मादभिक्रमणादूर्ध्वं प्रयाजशेषाभि
घारणस्य प्रयाजानां गुणो विधास्यते तस्मात्प्रयाजानां प्रकरणमद्याप्यवसीयत इत्यर्थः ॥ संदिग्धे तु व्यवायाद्वाक्यभेदः स्या
त् ॥ नन्वभिक्रमणस्य गुणस्तु श्रुत्युक्तक्रियांतरांगत्वोपजीवनेन न पूर्वोक्तरूपत्वविचारात् प्रकृतिपादे संगतिरुक्ता उपघ्यानस्य तु
वैयर्थ्यापादकश्रीतवारणसामर्थ्यरूपाल्लिंगाकर्तृसंस्कारत्वावगतेः सामान्यसंबंधापेक्षायां च प्रकरणात्प्रकृतकर्म्मा

रा० गत्वावगतेः क्वचिदंशेऽकृतित्वापाराशावानकृतिपादे संगतिरित्याशंक्य प्रासंगिकत्वेन संगतिमाह सिद्ध इति। कर्म्मणा
कर्त्त मपि संस्कारद्वारा कर्म्मान्वये सिद्धे प्रसंगात्किमवांतरप्रकरणेनोपस्थानं ध्यसामिधेन्यनुवचनमात्रे विनियोगो महाप्रक
46 रणाद्वा क्रतोर्दर्शपूर्णमासप्रकरण इति साध्यमते संगतिः॥ वार्त्तिकमते त्ववांतरप्रकरणात्कर्म्मणामभिक्रमणादीनामं
गत्वं तत्प्रयाजादिकर्मान्वये किं सामिधेन्यनुवचनावांतरप्रकरणस्योपस्थानेऽनुवर्त्तते न वेति संगतिरित्यर्थः॥ सामिधेन्यादीना
मुदाहरणत्वशंकासाध्यस्थयज्ञोपवीत शब्दाद्व्रतस्यायज्ञोपवीत्यं वा धीयीताध्यापयेद्याजयेदिति काठकशाखावि
हितकर्म्मांगत्वं तन्नवश्यत्वाधिगतं तु कयज्ञोपवीतशंकोपवीतोन्यानिरस्या। साध्ये तु सद्धिधर्म्मत्वशंकानिरासाय प्रकृतयज्ञा
गत्वोक्त्यर्थो यज्ञशब्दः॥ अस्मिन्ननुवाके सामिधेन्यो ऽस्मिन्त्रिविद इत्यादि विनियोगोक्तेः॥ प्रयोजनमाह तत्रेति। सामिधेनीप्रक
रणे वर्त्तमान एवोपवीतमाम्नातं निष्पन्नेवांतत्प्रकरणे इति न ज्ञायत इत्येवं संश्चेसंदिग्धश ह्रेष्याख्याते सामिधेनीनामवां ४६
तरप्रकरणस्यासावादत्र ह्त्यनत्र हन्निसंदेहो नन्पुक्त इत्याशंकार्थं नश्चिति साध्यपूर्वाधिकरणे साध्यकृतावांतरप्रकरणाकृत्याद
नादवांतरप्रकरणासावाशयवेन तावद्यावत्पेनावितिमहाप्रकरणेनांगतया सामिधेन्यादीनां ग्रहणात्कारणत्वासावेनेति

कर्त्तव्यताकांक्षालक्षणं प्रकरणं न संभवतीत्याशयः। ननु तेन सर्वाधिकरण एवावांतरप्रकरणं कृत्यादनात्स्वयाजादिषु दृष्टार्थे
ष्वंगेष्ववांतरप्रकरणसद्भावेपि सामिधेनीनां दृष्टार्थत्वेने [illegible] इति कर्त्तव्यतानाकांक्षत्वान्नावांतरप्रकरणमस्तीत्येवमाश
यत्वेन व्याचष्टे अथवेति। अस्मिन्पक्षे परस्य ड्ह्यस्य प्रकृष्टं करणमतिशयाधानं परप्रकरणशब्देन विवक्षितं। सत्यमिति प
रिहारस्तात्पर्यं अवांतरप्रकरणकृत्यादनाशयत्वेन तावद्व्याचष्टे नैतदिति। महाप्रकरणावगतभावनांगत्वोपपादकत्वात्प्रधाना प्रधान४
उपग्रहकरणत्वस्य न महाप्रकरणावगतेनांगत्वेन कथं भावस्थितिबध्यत इत्यर्थः। ननु अंगभावनानामंगान्वये प्राधान्यापत्तेः प्रधा
नभावनान्वयो विरुध्येतेत्याशंक्याह यथेति। यथांगवाक्यानामवांतरवाक्यार्थपर्यवसायिपरिपूर्णत्वाद्यर्थानामपि महावाक्यार्थो
पेक्षया साकांक्षत्वात्प्रधानवाक्यैकवाक्यत्वं तथापि अवस्थायां स्वार्थे परिपूर्णत्वेन आत्मीयं रूपं न विरुध्यते तथांगभावनानां स्वां
गनिरूपितप्राधान्येपि प्रधानभावनांगत्वं तथापि अवस्थायां स्वांगनिरूपितप्राधान्यमविरुद्धमित्याशयः। ननु सर्वाधिकरण एवा
वांतरप्रकरणकृत्यादनेनु यद्यपि परस्य ड्ह्यस्य प्रकृष्टं करणे निशयाधाने सामिधेन्यः उपयंते तथापि तासामवांतरप्रकरण
मस्तीत्येवं तात्पर्यं व्याख्येयमिति सूचयितुमाह संस्कारोपीति। ननु दृष्टार्थस्य प्रोक्षणादिसंस्कारस्यावांतरप्रकरणसद्भावेपि सा

रा.
४७

मिधेनीनां दृष्टार्थत्वेनेतिकर्त्तव्यतानाकांक्षत्वात्तन्नस्यादित्याशंक्य तास्वपि नियममाह दृष्टांशसिद्धये इतिकर्त्तव्यताकांक्षणादस्ये
वावांतरप्रकरणमित्याह दृष्टार्थेष्वपीति। किंच केवलदृष्टार्थेष्वपि दृष्टार्थेतिकर्त्तव्यताकांक्षणान्नदस्येवेत्याह दृष्टेष्विति। अतः
संस्काररूपाणामप्यंगानामवांतरप्रकरणमस्तीत्युपसंहरति तस्मादिति। नत्वेवमपि दृष्टार्थेष्वेवेति कर्त्तव्यतया सामिधेन्यन्तु वचन
स्यैनैराकांक्ष्यसिद्धेर्वासो विन्यासविशेषरूपोपस्थानात्मिकायाश्चेतिकर्त्तव्यतायाः श्रीनवातादिवारणात्मकदृष्टार्थत्वमाश्रेणप
र्यवसानाददृष्टार्थत्वावगतेस्तदाकांक्षा न संभवतीत्याशंक्याह तत्रेति। विवृत्तादि क्रमेणोपजनितो यो वर्णग्रहणसामर्थ्यकर
णरूपः श्रोत्रसंस्कारस्तदनुगृहीतेनेत्यर्थः। तस्माददृष्टार्थोपस्थानादीतिकर्त्तव्यताकांक्षाप्यस्तीत्युपसंहरति तस्मादिति। सामि
धेनीनामवांतरप्रकरणसद्भावेवासौ विन्यासरूपस्योपस्थानस्य तदंगत्वसंभवेन प्रकरणविच्छेदकत्वायोगात्प्रकरणनिष्टत्विरू
पसिद्धांतशंकानुपपत्त्या संदेहाभावेपार्थक्यंछ्नशितिराध्यमवांतरप्रकरणनिष्टत्त्वनिश्चयेनावांतरप्रकरणविरोधाभिश्चयान्म
हाप्रकरणेदर्शपूर्णमासार्थत्वसिद्धांतसिद्धेरयुक्तमाशंक्योपपादयितुमाह एवं तर्हीति। संदिग्धेपि वलवद्विरोधेदुर्वलस्याविनि ४७
योक्तत्वं न संभवतीत्याशयः। सामिधेनीप्रकरणविच्छेदकौक्यर्थेनिवित्यादानीतिराध्यंव्याचष्टे उच्यत इति। एवं सत्यवांतर

प्रकरणाद्युत्पन्निरूपस्सर्वपक्षशंकाद्युपपन्नेऽस्मिन्संदेहो न संभवतीत्याक्षेपार्थं यदीति लाघ्याभवयवं व्याचष्टे एवंतर्हीति ॥ निविडि
र्विज्ञिन्नस्थापि सामिधेनीप्रकरणस्थकाष्ठेऽस्सामिधेनीकल्पैर्भूज्जीवनसंभवात्संभवसंदेहादनुत्पत्त्या नत्तु त्पन्निसंदेहोपपाद
नार्थं परस्मादिति लाघ्यं व्याचष्टे नेतदिति ॥ किंतावदित्यादिः सर्वपक्षलाघ्यं तात्पर्यतो व्याचष्टे किंतावदिति ॥ निविडाऽस्राक्रूपस्था
त्सामिधेनीनां कीर्तनात्काष्ठसामिधेनीकल्पपर्यंतं सामिधेनीप्रकरणाद्युत्पन्नावस्थापद्याप्यनपर्यंतं कथमन्युत्पत्त्यवगतिरि
न ५ त्याशंक्य निष्ठवाहितं त्वेद्यन्यथ्यपादोऽसंभवति तद्दिर्विवृद्धयोथाव्राहे तपद्यानात्यन्नादपि सामिधेन्यनुवचनांगकीर्तनात्देवावे
सामिधेनीरन्यत्र यज्ञं नावपत्र विनिविड्ढोवाघारविधयपूर्क्रमे सामिधेन्यनुवचनोपसंहाराडपद्यानेपि सामिधेनीप्रकरणा
द्युत्पन्निश्च स्थितो न्याश्रविता ॥ निविदामथ्यद्य वक्ष्यायकवार्थसंदेहसमर्थनोपसंहारस्त लाघ्यानुसारात्परप्रकरणेपाठस्त्वस्यापदा
नरत्वेनोत्तरस्र्त्यं व्याख्याख्यानुमथवेत्युक्तं ॥ सामिधेनीवन्निविदामपि अग्नि सामिंधनप्रकाशनार्थत्वेपि सामिधेनीनामग्निसमिंध
नार्थं [illegible] काष्ठत्वे प्रपत्र्प्रकाशनार्थत्वात् निविदामिश्रप्रत्तेपफलाग्निसमिंधननिष्पन्निप्रकाशनार्थत्वादगन्यधेयस्संज्योतिष्टोमे
निदर्शपूर्णमासफलनिष्पन्निप्रकाशनार्थद्यमंत्रस्य दर्शपूर्णमासांगत्ववत्सामिधेनीप्रकाशेयमप्रत्तेपफलनिष्पन्निप्रका

रा० शनार्थत्वान्निविदां सामिधेन्यंगतायुक्तेत्यर्थः॥ उत्तरार्द्धं व्याचष्टे यथेति॥ सर्वमुक्तमुपसंहरति इतीति॥ सिद्धांतमाहेति प्राप्तइति॥
५८ सोऽत्रवाक्यभेदः शंक्यते एकवाक्यतारूपप्रकरणरूपधाकैकवाक्यत्वाभावेऽप्यस्त्यनेनार्थाद्याख्यानेन तदुपपत्तिर्नैव नद्यवायोऽन्यायिक्या
ख्यार्थं विच्छिन्नेत्युक्त्वा कार्यैः सामिधेनीकल्पैः सामिधेनीप्रकरणोज्जीवनान्निविदां विच्छेदकत्वं भवतीत्याशंक्य नहीत्युक्तं
नहीत्येतावतो निषेधार्थत्वाद्धिशब्दद्वयापोनरुक्त्यं॥ निविदामपि सामिधेन्यंगत्वात्कथं तत्प्रकरणविच्छेदकतेत्याशंक्य सा
मिधेनीभिरसंबद्धेमध्यग्रंथेनेतिभाष्यावयवश्चितं निविदामनंगत्वमुपपादयितुमाहतावद्धीति॥ नत्विहइतिश्रुतनिषेधया सा
मिधेनीप्रकाशेध्मप्रक्षेपफलाग्निसमिंधननिष्पत्तिप्रकाशनादगत्वमस्यारित्यादीनां दर्शपूर्णमासांगत्ववन्निविदां सा ==
मिधेन्यंगत्वं स्याद्विधत्तीत्याशंक्याहतत्त्वेतिदर्शपूर्णमासादिफलस्याहष्टद्वारसाध्यत्वेनप्रत्यक्षापेक्षत्वाद्भावाजननात्फलनि
ष्पत्तिप्रकाशनस्यांगत्वं युक्तं इध्मप्रक्षेपफलस्य त्वग्नेः स सिद्धत्वस्याहष्टद्वारसाध्यत्वेनप्रत्यक्षानपेक्षत्वात्फलनिष्पत्तिप्रकाश
नस्यांगत्वं नयुक्तमित्याशयः॥ सामिधेनीनामपि निवित्प्रकाश्याग्निसमिंधनेसाधनेध्मप्रक्षेपप्रकाशनार्थत्वान्निविदंग
ताकल्पयितुं शक्येत्याहा यथेति॥ पूर्वार्द्धं व्याख्याय उपसंहरति नेति॥ उत्तरार्द्धं व्याख्यातुमाहकाम्येष्विति॥ एकविंशतिमत्त ५८

ते१

ब्रूया[illegible]त्प्रतिष्ठाकामश्चेत्यादिषष्ठीश्रुत्याकाम्यकल्पानांपुरुषार्थत्वावगतेऽप्रकरणेऽर्थग्रहणान्नउज्जीवनंनसंभवतीत्या
शयः। नन्वेवंमतिकाम्यकल्पेनैवप्रकरणविच्छेदसंभवात्त्रिविद्भिर्विच्छेदोक्तिरनर्थिकेत्याशंक्याह यदिपुनरिति। नन्वनंगत्वेपि
निविदांपरप्रकरणपाठसंभवान्नप्रकरणविच्छेदकतास्त्वीत्याशंक्याह। तथापीति। काम्यकल्पनामंगत्वाभावेनप्रकरणाउत्पत्ति
प्रमाणाभावान्नतद्बलेनपरप्रकरणपाठकल्पनायुक्तेत्याशयः। एवंचनिविदामंगत्वस्यपरप्रकरणपाठस्यवाकल्पयितुमश
क्यत्वादन्तरप्रकरणविच्छेदकत्वंसिद्धेर्म्महाप्रकरणेनोपवीतस्यकल्प्यदर्शपूर्णमासार्थताप्युक्तेतिस्वार्थमुपसंहरति। नावि
ति। ननुदृष्टेंद्रियकामाधिकरणन्यायेनैकविंशत्यादेर्गुणात्फलावगतेर्निराश्रयस्यचगुणस्यफलान्वयानुपपत्तेऽविच्छिन्नेव
प्रकरणेनेनाश्रयादानाद्वाक्येनवाश्रयदानेगुणफलान्वयाश्रपिसंबंधद्वयकरणाद्वाक्यभेदापत्तेर्भविनांतरत्वाद्वाक्यभेदप
रिहारेरेवतीवारवंतीयादिष्वपिवाक्येनाश्रयदानाद्गुणफलान्वयोपपत्तेऽस्थितसिद्धांतहानिप्रसंगात्प्रकरणेनाश्रयलाभा
र्थंविच्छिन्नस्यापिप्रकरणस्यकाम्यकल्पेरुज्जीवनावगतेरुपवीतस्यापिसाभिधेयत्वंगत्वप्रसंगाद्दुर्घटःसिद्धांतइत्याशंकते। ननु
ति। प्रकृतनाश्रयलाभात्कर्मणएवात्रफलंनगुणादितिपरिहरति। उच्यतेइति। श्रोकंच्यानष्टेनैवेति। ननुकर्म्मांतरत्वेसंख्ययानुपा

रा·
४९

49

वाकर्मान्तर

दानात्संख्यामात्रविशिष्टानुवचनविधिरपरिशिष्टः स्यादित्याशंक्यातिदेशात्संख्येयत्वात्समाह कथमिति। ननु कर्मान्तर
त्वेपि काम्येनैव सामिधेन्यनुवचनेन प्रसंगात्कृतार्थसामिधेन्यनुवचनकार्य्याग्निसमिन्धनप्रकाशनसिद्धेर्गुणकामनुत्पात्र
श्रुतावगमात्कर्मान्तरत्वोक्तिः किमर्थेत्याशंक्याह यद्यपीति। अनुष्ठानाविशेषेपि श्रुतत्वाश्रयाल्लाभात्तद्गुणफलत्वयानुप
पत्तेः कर्मान्तरविधिं विनावाक्यानर्थक्यप्रसंगात्कर्मान्तरत्वोक्तेत्याशयः। ननु कर्मान्तरत्वेपृथक्प्रयोगापत्तेस्तेनाप्रसंगात्कृ
त्वर्थसामिधेन्यनुवचनकार्य्यासंभवात्कर्मान्तरत्वयोरनुष्ठानेविशेषाभावेप्येवेत्याशंक्य तन्नवेति। प्रकृतानुपयोगित्वाद्देवतानै
यशंक्याप्युक्तेत्याह नतावदिति। नच कर्मान्तरत्वेपि पृथक्प्रयोगापत्तिरित्याह नचेति। एतदेव प्रपञ्चयति क्रतुनेति। यस्य
न मः प्रवक्रु इत्यादि निगदस्य पश्चात्सामिधेनीवचने क्रियमाणे पश्चाद्वचनवाच्यैकविंशतिमनुब्रूयादित्ययमनुशब्दः प्रयु
ज्यते तस्य निगदरूपस्याग्न्यप्रयुक्तत्वेन पृथक्प्रयोगे सति सामिधेनीनिरपेक्षत्वादनुवचनत्वविघातापत्तेर्न पृथक्प्रयोगो युक्त
इति तावेशानवमंगीकृत्य चारथ्ये पृथक्प्रयोगेपि सामिधेन्यंगत्वान्निगदोनुप्रयुज्यत इत्याशंक्यानिरस्यन्नस्मात्कयावचेष्टयो ४९
हीति। जातवेदोऽस्मयापपश्यन्मयीति लिंगान्निगदस्याग्निप्रकाशनार्थत्वावगतेर्न सामिधेन्यंगतेत्याशयः। अन्ये तु समिध्यमा

नायात्तु ऊहीति पृषपत्त्वाज्ञावनिमित्तोत्तु शद्बोत्स विध्यतीत्याशंक्य पृथक्प्रयोगेकर्त्तव्यर्थाग्निसमिंधनशेषसामेरनाशंक्य
त्वात्रिंगदानंतर्य्यनिमित्तता तु शब्दस्थाशंक्येतसावस्था तंत्र्येसतिन संलवनीतिपरिहारार्थं तदनंतरत्वेनचेत्युक्तं। पृथक्प्र
योगेवसत्येकविंशत्यादिसंख्यापरिछेद्यत्वेनातिदेशप्राप्तानामपिप्रवेशाजाज्यासिद्धवत्याद्यानाश्चामग्निसमिंधना
र्थशक्तत्वेनसामिधेनीत्वात्तावापत्तेरप्रयोगमध्यपृथ्यावाये निष्प्रयोजनत्वेनासमिंधनीयत्वादाह त्वामग्निसमिंधनप्रकाशक
त्वाद्युपपन्नेत्यसामिधेनीनामेकविंशत्यादिसंख्यापरिछेद्यतातिदेशप्राप्ताविहन्यतेत्याह किंचेति। आकंख्यावशेषाएकविंशत्या
दिविष्टावदितिउत्तराईत्याख्यार्थं संचेत्युक्तं। कथं तर्हिकर्म्मांतरत्वेप्यंतःक्रतुप्रयोगसिद्धिरित्याशंक्याह तेनेति। येनकार
णेनाग्निसमिंधनप्रकाशनत्वं विनासामिधेनीत्वं नसंभवतिक्रतुप्रयुक्तत्वं च विनाप्यस्यसामिंधनीयत्वं नसंभवतितेनकारण
नार्थ्यविधानकर्म्मत्वविष्यतासंयोगश्रुतनिमित्तत्वाभ्नदर्थेलिहि विधीयतइतिचतुर्थाधिकरणन्यायेनावगतंत्याग्नि
समिंधनप्रकाशनार्थविधानसामिधेनीकर्म्मस्वरूपस्यप्रकृतिस्थक्रत्वर्थसामिधेन्यनुवचनप्रकाश्येसामिधेन्यनुवचनेप्र
वेशात्प्रयोगमध्यपात्यग्निसमिंधनाधीनत्वेकर्म्मांतरत्वेतस्यापिकाम्यस्यसामिधेन्यनुवचनस्येत्युक्तेप्रयोगमध्यपात्याग्नि

रा. समिंधनप्रकाशनस्य पंचदशसंख्यावच्छिन्नसामिधेनीसाध्यत्वात्कथमेकविंशत्यादिसंख्यावच्छिन्नसामिधेन्युक्तवचनेन
५० सिद्धिरित्याशंक्य शाकृतस्य चेदुक्तोपवीतस्थानिविद्धवहितकवत्थसामिधेन्यनंगत्वेपि काष्ठसामिधेन्यंगत्वं विध्यतीत्या
शंकार्थं नत्त्वसामिधेनीकल्यानामिति राद्धांतयावष्टंभनत्वाविति। निविद्धवधानाभिष्ट्रत्वस्य कवथसामिधेनीप्रकरणस्थका
ष्ठेषु सामिधेनीकल्पेषु प्रकरणेनाश्रयालाभाद्वाक्येनाश्रयाकांक्षयाभ्युपगमापत्तेस्सन्नयवत्वाकपालेदशसंगाद्गुणफलाकांक्षया
संस्त्वेनाश्रयापेक्षाभावान्न निमित्तोऽजीवनाद्युपपत्तेः प्रकरणेनाश्रयालाभेपि गुणफलाकांक्षयास्यपगमेनाश्रयतया सा
मिधेनीग्रहणेपि तासां संख्यान्वयित्वमात्रेण यात्यतया कर्त्तव्यत्वेनाविधानात्संख्यासामिधेन्यन्वयस्य वाक्येनैवाभ्युपगम
नीयत्वापत्तेर्गुणफलान्वयेपि प्रकरणानपेक्षणात्सामिधेनीनांप्रकृतत्वाभावात्प्रकरणेनोपवीतग्रहणानुपपत्तेः सामिधे
नीवाक्यानंतर्गतत्वाच्च वाक्येनोपवीतग्रहणानाशंकात्वान्नकाम्यानामपि सामिधेनीनामुपवीतसंगमिति परिहारार्थं नेति
ब्रूमइत्यादिराद्धांतकाष्ठेषु सामिधेन्यकल्पेषु कवत्थसामिधेनीप्रकरणानुष्ठानावपि काष्ठसामिधेनीप्रकरणेनैवोपवीत
मितिग्रहणोपपत्तेर्गुणफलान्वयस्य वविच्छिन्नप्रकृताश्रयत्वेनानिष्टत्वादुपेक्षणस्य च काष्ठानां सामिधेनीनां प्रकृतांगनिराकां ५०

प्रा

त्त्वेन प्रकरणात्वात्सन्नावेपि देवावैसामिधेनीरहस्येत्यस्यापारार्थ्यवादंगत्वेनसामिधेनीप्रकरणानन्तुवर्त्तिक
त्वादत्त्वदर्शकांतरस्थत्वानाशंकनीयत्वात्सन्निधिनोपनीतमंगंस्यात्सचप्रकरणाद्दुर्बलइत्येवंपरिहारमाहनैतदिति।
श्रोकंस्याचेहेत्सर्वत्वेवेति। अतिदेशलभ्यानामप्रकृतानामंगानांक्रमोपकारकत्वेनोपदिष्टत्वात्‌४प्राप्तिकृतिसिर्यह
णात्वपदाज्येनानुयाजान्यजतीत्यादीनांचप्राकृतानांगुणत्वेनोपदिष्टानामपूर्वाणामप्यंगानांक्रमोप[illegible]त्वेनोपस्था
नपरिस्सणप्राकृतांगग्राहित्वाविकृतिनावनयाकृतांगग्रहणवेलायामेवग्रहणान्नदंगानांचानिर्द्दिष्टाकांक्षत्वात्प्रकर
णेनैवप्राकृतांगग्रहणोपपन्नेसद्यावन्नोयदित्युक्ताः प्राकृतांगग्रहणसमकालंलक्षणार्थोमध्यप्राप्तश्रुतिषेवनीयसान्नि
धिपठितानांविदेवनादीनांस्थानादलिषेवनीयांगत्वस्यप्रतिज्ञासमानस्य प्रकरणावगतेनराजसूयांगत्वेनबाधोबला
बलाधिकरणेवक्ष्यमाणः४कांम्यसामिधेनीसन्निधिनोपनीतस्यकाम्यस्यअभिधेन्यंगतायाः४प्रकरणावगतेनदर्शपूर्णमासां
